# Shri Ramakrishna bhujangam

# શ્રીરામકૃષ્ણભુજઙ્ગમ્

## Document Information

Text title : Shri Ramakrishna bhujangam

File name : rAmakRRiShNabhujangam.itx

Category : deities_misc, gurudev, rAmakRiShNa, bhujanga

Location : doc_deities_misc

Author : Kuttamattukunniyuru Kunjukishna Kurupa

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણભુજઙ્ગમ્

સદાકારમોઙ્કાર મન્ત્રૈકસારં
સદાનિર્વિકારં ચિદાનન્દપૂરમ્ ।
અણોરપ્યણું સર્વધીસાક્ષિભૂતં
ગુરૂણાં ગુરું ભાવયે રામકૃષ્ણમ્ ॥ ૧॥

યુગેઽસ્મિન્ કલૌ સઙ્કુચત્સારતત્ત્વં
સમુલ્લાસયન્ લોકપદ્માકરં યઃ ।
પ્રભો ! કર્મસાક્ષીવ સાક્ષાદ્બભૂવ
પ્રભાપ્રોજ્જ્વલં તં ભજે રામકૃષ્ણમ્ ॥ ૨॥

ભૃશં કામિનીં કાઞ્ચનં કિઞ્ચનાપ્ય-
સ્પૃશન્ સુપ્તિકાલેઽપિ યોઽભૂદસઙ્ગઃ ।
અતિશ્લાઘ્યવૈરાગ્ય સૌભાગ્યમૂર્તિ
ભવચ્છેદિનં તં ભજે રામકૃષ્ણમ્ ॥ ૩॥

જટાં વક્ત્ર વૈરાગ્યલક્ષ્મીકચાભા-
-મુરોલમ્બિતશ્મશ્રુમાલાં વહન્તમ્ ।
લસદ્-ભ્રૂયુગાન્તઃ સ્ફુરદ્ભાવ-દૃષ્ટિ-
પ્રમૃષ્ટ પ્રપઞ્ચં ભજે રામકૃષ્ણમ્ ॥ ૪॥

યથાન્તર્બહિર્નિર્વિકારસ્વભાવ-
સ્ફુટાશંસદન્તદ્યુતિ ધોતિવક્ત્રમ્ ।
સમસ્તપ્રકૃત્યન્તિમસ્થસ્વલીલા-
સમાકૃષ્ટવિશ્વં ભજે રામકૃષ્ણમ્ ॥ ૫॥

દ્રુતસ્વર્ણસાવર્ણ્ય ભૃદ્રમ્યગાત્રો-
-પવીતીકૃતસ્વચ્છ દિવ્યોત્તરીયમ્ ।
મહાપીનવક્ષો ભુજાભારકિઞ્ચિત્-
-સમાકુઞ્ચિતાઙ્ગં ભજે રામકૃષ્ણમ્ ॥ ૬॥

વસાનં સુધાશુભ્રવસ્ત્રં સુગાત્રં
    સ્ફુરચ્ચારુપદ્માસનસ્થં પવિત્રમ્ ।
વિશાલાઙ્કુવિન્યસ્ત વિશ્વૈકરક્ષા-
    -વિધાનાઞ્જલિં તં ભજે રામકૃષ્ણમ્ ॥ ૭॥

“અહં સર્વસાક્ષીમહાહંસયોગી” ત્યહો
    નિર્વિકલ્પે સમાધૌ જગત્યામ્ ।
પરં પામરાણામપિ વ્યઞ્જયન્તં
    ભ્રમં માર્જયન્તં ભજે રામકૃષ્ણમ્ ॥ ૮॥

જગત્ સૃષ્ટિરક્ષાલયસ્વૈરલીલા-
    મહાવીર્યમૈશ્વર્યસમ્પત્સમૃદ્ધમ્ ।
ભવતપ્તભક્તાવનૈકપ્રવીણં
    પુરાણં પુમાંસં ભજે રામકૃષ્ણમ્ ॥ ૯॥

પુરા યેન તત્ત્વં વસિષ્ઠાદ્ગૃહીતં
    પુનઃ પાણ્ડુપુત્રાય યોઽદાત્તદેવ ।
સ રામશ્ચ કૃષ્ણશ્ચ તત્તત્ત્વમૂર્ત્યા
    ગ્રહીત્ સામ્પ્રતં રામકૃષ્ણાવતારમ્ ॥ ૧૦॥

પુરા રાવણાદીન્ યયા ચેદિપાદીન્
    રુષા પ્રાવધીસ્ત્વં તથાઽસ્મિન્યુગેઽપિ ।
મહામૌઢ્યરુઢોદ્ભતાધર્મદાર્ઢ્યં
    સમુત્પાટ્ય ધર્મપ્રતિષ્ઠાં કરોષિ ॥ ૧૧॥

જય શ્રીપતે ! સર્વલોકેશ ! વિષ્ણો,
    જય ક્ષીરવારાશિશાયિન્ ! કૃપાલો ! ।
જય શ્રી વરાહાકૃતે ! શ્રી નૃસિંહ !
    પ્રભો ! ભારતોદ્ધારકા ! બ્રહ્મમૂર્તે ॥ ૧૨॥

વિવેકો-દિતાનન્દમન્દાકિની યત્
    પદાબ્જોદ્ભવા સર્વલોકાન્ પુનાતિ ।
કુધીભિર્દુરાપં કૃપાપૂર્ણ રૂપં
    તમીશં વિતૃષ્ણં ભજે રામકૃષ્ણમ્ ॥ ૧૩॥

મહાભક્તિસેવ્યં મહાયોગભાવ્યં

મહાજ્ઞાનગમ્યં ચિદાનન્દરમ્યમ્ ।
અવર્ણ્યં વરેણ્યં મહૈશ્વર્યપૂર્ણં
ભજે રામકૃષ્ણં ભજે રામકૃષ્ણમ્ ॥ ૧૪॥

ઇતિ મહાકવિના કુટ્ટમત્તુકુન્નીયૂરુકુઞ્જૂકૃષ્ણકુરુપ નામકેન વિરચિતં
“રામકૃષ્ણભુજઙ્ગમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Ramakrishna bhujangam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*